# Shri BhuvaneshvarI Shuddha Shakti Khadgamala

# શ્રીભુવનેશ્વરીશુદ્ધશક્તિખડ્ગમાલા

## Document Information

Text title : bhuvaneshvarIshuddhashaktikhaDgamAlA

File name : bhuvaneshvarIshuddhashaktikhaDgamAlA.itx

Category : devii, devI, dashamahAvidyA, mAlAmantra

Location : doc_devii

Proofread by : Ganesh Kandu kanduganesh at gmail.com, NA

Latest update : February 2, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

Shri BhuvaneshvarI Shuddha Shakti Khadgamala

# શ્રીભુવનેશ્વરીશુદ્ધશક્તિખડ્ગમાલા

વિનિયોગઃ–
ૐ અસ્ય શ્રીભુવનેશ્વરી-ખડ્ગ-માલા-મન્ત્રસ્ય શ્રીપ્રકાશાત્મા ઋષિઃ,
ગાયત્રી છન્દઃ, શ્રીભુવનેશ્વરી દેવતા, હં બીજં, ઈં શક્તિઃ, રં
કીલકં, શ્રીભુવનેશ્વરી-પરામ્બા-પ્રસન્નાર્થે જપે વિનિયોગઃ ।

ઋષ્યાદિ-ન્યાસઃ-
શ્રીપ્રકાશાત્મા-ઋષયે નમઃ શિરસિ, ગાયત્રી-છન્દસે નમઃ
મુખે, શ્રીભુવનેશ્વરી-દેવતાયૈ નમઃ હૃદિ, હં બીજાય નમઃ
ગુહ્યે, ઈં શક્તયે નમઃ પાદયોઃ, રં કીલકાય નમઃ નાભૌ,
શ્રીભુવનેશ્વરીપરામ્બા-પ્રસન્નાર્થે જપે વિનિયોગાય નમઃ સર્વાઙ્ગે ।

ધ્યાનં-
સ્મરેદ્ રવીન્દ્વગ્નિ-વિલોચનાં તાં, સત્પુસ્તકાં જાપ્ય-વટીં દધાનામ્ ।
સિંહાસનાં મધ્યમ-યન્ત્ર-સંસ્થાં, શ્રીતત્ત્વ-વિદ્યાં પરામ્બાં ભજામિ ॥

ય એનાં-સચિન્તયેન્મન્ત્રી, સર્વ-કામાર્થ-સિદ્ધિદામ્ ।
તસ્ય હસ્તે સદૈવાસ્તિ, સર્વ-સિદ્ધિર્ન સંશયઃ ॥

તાદૃશં ખડ્ગમાપ્નોતિ, યેન હસ્ત-સ્થિતેન વૈ ।
અષ્ટાદશ-મહા-દ્વીપે, સમ્રાટ્ ભોક્તા ભવિષ્યતિ ॥

ૐ શ્રીં હ્રીં શ્રીં શ્રીભુવનેશ્વરી-હૃદય-દેવિ શિરોદેવિ
શિખા-દેવિ કવચ-દેવિ નેત્ર-દેવ્યસ્ત્ર-દેવિ કરાલે વિકરાલે
ઉમે સરસ્વતિ શ્રીદુર્ગે ઉષે લક્ષ્મિ શ્રુતિ સ્મૃતિ ધૃતિ શ્રદ્ધે
મેધે રતિ કાન્તિ આર્યે શ્રીભુવનેશ્વરિ દિવ્યૌઘ-ગુરુ-રૂપિણિ
સિદ્ધૌઘ-ગુરુ-રૂપિણિ માનવૌઘ-ગુરુ-રૂપિણિ શ્રી-ગુરુ-રૂપિણિ
પરમ-ગુરુ-રૂપિણિ પરાપર-ગુરુ-રૂપિણિ પરમેષ્ઠી-ગુરુ-રૂપિણિ
અમૃતભૈરવ-સહિત-શ્રીભુવનેશ્વરિ હૃદય-શક્તિ શિરઃ-શક્તિ
શિખા-શક્તિ કવચ-શક્તિ નેત્ર-શક્ત્યસ્ત્ર-શક્તિ હૃલ્લેખે

ગગને રક્તે કરાલિકે મહોચ્છૂષ્મે સર્વાનન્દ-મયચક્ર-સ્વામિનિ!

ગાયત્રી-સહિત-બ્રહ્મ-મયિ સાવિત્રીસહિત-વિષ્ણુ-મયિ
સરસ્વતી-સહિત-રુદ્ર-મયિ લક્ષ્મી-સહિત-કુબેર-મયિ
રતિ-સહિતકામ-મયિ પુષ્ટિ-સહિત-વિઘ્ન-રાજ-મયિ
શઙ્ખ-નિધિ-સહિત-વસુધા-મયિ પદ્મ-નિધિ-સહિતવસુમતિ-મયિ
ગાયત્ર્યાદી-સહ-શ્રીભુવનેશ્વરિ હ્રાં હૃદય-દત્વે હ્રીં શિરો-દેવિ
હ્રૂં શિખા-દેવી હ્રૈં કવચ-દેવિ હ્રૌં નેત્ર-દેવિ હ્રઃ અસ્ત્ર-દેવિ
સર્વ-સિદ્ધિ-પ્રદ-ચક્ર-સ્વામિનિ!

અનઙ્ગ-કુસુમે અનઙ્ગ-કુસુમાતુરે અનઙ્ગ-મદને અનઙ્ગ-મદનાતુરે
ભુવન-પાલે ગગન-વેગે શશિ-રેખે અનઙ્ગ-વેગે
સર્વ-રોગ-હર-ચક્ર-સ્વામિનિ!  કરાલે વિકરાલે ઉમે સરસ્વતિ
શ્રીદુર્ગે ઉષે લક્ષ્મિ શ્રુતિ સ્મૃતિ ધૃતિ શ્રદ્ધે મેધે રતિ કાન્તિ
આર્યે સર્વ-સંક્ષોભણ-ચક્ર-સ્વામિનિ!

બ્રાહ્મિ માહેશ્વરિ કૌમારિ વૈષ્ણવિ વારાહિ ઇન્દ્રાણિ ચામુણ્ડે
મહા-લક્ષ્મ્યં-ઽનઙ્ગ-રૂપેઽનઙ્ગ-કુસુમે મદનાતુરે ભુવન-વેગે
ભુવન-પાલિકે સર્વ-શિશિરેઽનઙ્ગ મદનેઽનઙ્ગ-મેખલે
સર્વાશા-પરિપૂરક-ચક્ર-સ્વામિનિ!

ઇન્દ્ર-મય્યગ્નિ-મયિ યમ-મયિ નિઋતિ-મયિ વરુણ-મયિ વાયુ મયિ
સોમ-મયીશાન-મયિ બ્રહ્મ-મય્યનન્ત-મયિ વજ-મય્યગ્નિ-મયિ
દણ્ડ-મયિ ખડ્ગ-મયિ પાશ-મય્યંકુશ-મયિ ગદા-મયિ
ત્રિશૂલ-મયિ પદ્મ-મયિ ચક્ર-મયિ વર-મય્યઙ્કુશ-મયિ
પાશ મય્યભય-મયિ બટુક-મયિ યોગિની-મયિ ક્ષેત્રપાલ-મયિ
ગણ-પતિ-મય્યષ્ટ-વસુ-મયિ દ્વાદશાદિત્ય-મય્યેકાદશ-
રુદ્ર-મયિ સર્વ-ભૂત-મય્યમૃતેશ્વર-સહિતશ્રીભુવનેશ્વરિ
ત્રૈલોક્ય-મોહન-ચક્ર-સ્વામિનિ નમસ્તે નમસ્તે નમસ્તે સ્વાહા શ્રીં
હ્રીં શ્રીં  ૐ ॥

ફલ-શ્રુતિઃ-
કથયામિ મહાદેવિ! ભુવનેશીં મહેશ્વરીમ્ ।
અનયા સદૃશો વિદ્યા નાન્યા જ્ઞાનસ્ય સાધને ॥ ૧॥

નાત્ર ચિત્ત-વિશુદ્ધિર્વા નારિ-મિત્રાદિ-દૂષણમ્ ।

ન વા પ્રયાસ-બાહુલ્યં સમયાસમયાદિકમ્ ॥ ૨॥

દેવૈર્દેવત્વ-વિધયે સિદ્ધૈઃ ખેચર-સિદ્ધયે ।
પન્નગૈ રાક્ષસૈર્મર્ત્યૈર્મુનિભિશ્ચ મુમુક્ષુભિઃ ॥ ૩॥

કામિભિર્ધર્મિભિશ્ચાર્થ-લિપ્સુભિઃ સેવિતા પરા ।
ન તથા વ્યય-બાહુલ્યં કામ-ક્લેશ-કરં તથા ॥ ૪॥

ય એવં ચિન્તયેન્મન્ત્રી સર્વ-કામાર્થ-સિદ્ધિદામ્ ।
તસ્ય હસ્તે સદૈવાસ્તિ સર્વ-સિદ્ધિર્ન સંશયઃ ॥ ૫॥

ગદ્ય-પદ્ય-મયી વાણી સભાયાં વિજયી ભવેત્ ।
તસ્ય દર્શન-માત્રેણ વાદિનો નિષ્કૃતાદરઃ ॥ ૬॥

રાજાનોઽપિ હિ દાસત્વં ભજન્તે કિં પ્રયોજનઃ ।
દિવા-રાત્રૌ પુરશ્ચર્યા કર્તુશ્ચૈવ ક્ષમો ભવેત્ ॥ ૭॥

સર્વસ્યૈવ જનસ્યેહ વલ્લભઃ કીર્તિ-વર્ધનઃ ।
અન્તે ચ ભજતે દેવી-ગણત્વં દુર્લભં નરઃ ॥ ૮॥

ચન્દ્ર-સૂર્ય-સમો ભૂત્વા વસેત્ કલ્પાયુતં દિવિ ।
ન તસ્ય દુર્લભં કિઞ્ચિત્ યો વેત્તિ ભુવનેશ્વરીમ્ ॥ ૯॥

ઇતિ શ્રીભુવનેશ્વરીરહસ્યે શ્રીશુદ્ધશક્તિખડ્ગમાલાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ganesh Kandu kanduganesh at gmail.com

*Shri BhuvaneshvarI Shuddha Shakti Khadgamala*
pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*